.. guru giitaa - short version ..

# ॥ श्रीगुरुगीता ॥

॥ श्री ॥
॥ श्री गुरुपादुका पञ्चकम् ॥
ॐ नमो गुरुभ्यो गुरुपादुकाभ्यो नमः परेभ्यः परपादुकाभ्यः ।
आचार्य सिद्धेश्वर पादुकाभ्यो नमो नमः श्री गुरुपादुकाभ्यः ॥

ऐङ्कार ह्रईङ्कार रहस्य युक्त
श्रीङ्कार गूढार्थमहाविभूत्या ॥ १॥
ओङ्कार मर्म प्रतिपादिनीभ्यां
नमो नमः श्री गुरुपादुकाभ्याम् ॥ २॥
होत्राग्नि हौत्राग्नि हविष्यहोत्र
होमादि सर्वाकृति भासमानाम् ।
यद् ब्रह्म तद्बोध वितारिणीभ्यां
नमो नमः श्री गुरुपादुकाभ्याम् ॥ ३॥
कामादि सर्पव्रज गारुडाभ्यां
विवेक वैराग्य निधि प्रदाभ्याम् ।
बोध प्रदाभ्यां दृतमोक्षदाभ्यां
नमो नमः श्री गुरुपादुकाभ्याम् ॥ ४॥
अनन्त संसार समुद्र तार
नौकायिताभ्यां स्थिरभक्तिदाभ्याम् ।
जाड्याब्धि संशोषण वाडवाभ्यां
नमो नमः श्री गुरुपादुकाभ्याम् ॥ ५॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥
॥ अथ श्री गुरुगीता प्रारंभः ॥
श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः । श्रीगुरुभ्यो नमः ।

॥ ॐ ॥
अस्य श्रीगुरुगीतास्तोत्रमन्त्रस्य भगवान् सदाशिव ऋषिः ।
नानाविधानि छन्दांसि । श्रीगुरुपरमात्मा देवता ।
हं बीजं । सः शक्तिः । क्रों कीलकं ।
श्रीगुरुप्रसादसिद्ध्यर्थे जपे विनियोगः ।

॥ अथ ध्यानम् ॥
हंसाभ्यां परिवृत्तपत्रकमलैर्दिव्यैर्जगत्कारणै-
र्विश्वोत्कीर्णमनेकदेहनिलयैः स्वच्छंदमात्मेच्छया ॥
तद्योतं पदशांभवं तु चरणं दीपाङ्कुर ग्राहिणम् ।
प्रत्यक्षाक्षरविग्रहं गुरुपदं ध्यायेद्विभुं शाश्वतम् ॥

मम चतुर्विधपुरुषार्थसिद्ध्यर्थे जपे विनियोगः ।

॥ अथ श्रीगुरुगीता ॥
सूत उवाच - -

कैलासशिखरे रम्ये भक्ति संधान नायकम् ।
प्रणम्य पार्वती भक्त्या शङ्करं पर्यपृच्छत ॥ १॥

श्री देव्युवाच - -

ॐ नमो देव देवेश परात्पर जगद्गुरो ।
सदाशिव महादेव गुरुदीक्षां प्रदेहि मे ॥ २॥

केन मार्गेण भो स्वामिन् देहि ब्रह्ममयो भवेत् ।
त्वं कृपं कुरु मे स्वामिन् नमामि चरणौ तव ॥ ३॥

ईश्वर उवाच - -

मम रूपासि देवि त्वं त्वत्प्रीत्यर्थं वदाम्यहम् ।
लोकोपकारकः प्रश्नो न केनापि कृतः पुरा ॥ ४॥

दुर्लभं त्रिषु लोकेषु तच्छृणुष्व वदाम्यहम् ।
गुरुं विना ब्रह्म नान्यत् सत्यं सत्यं वरानने ॥ ५॥

वेद शास्त्र पुराणानि इतिहासादिकानि च ।
मन्त्र यन्त्रादि विद्याश्च स्मृतिरुच्चाटनादिकम् ॥ ६॥

शैव शाक्तागमादीनि अन्यानि विविधानि च ।
अपभ्रंशकराणीह जीवानां भ्रांत चेतसाम् ॥ ७॥

यज्ञो व्रतं तपो दानं जपस्तीर्थं तथैव च ।
गुरुतत्त्वमविज्ञाय मूढास्ते चरते जनाः ॥ ८॥

गुरुबुद्ध्यात्मनो नान्यत् सत्यं सत्यं न संशयः ।
तल्लाभार्थं प्रयत्नस्तु कर्तव्यो हि मनीषिभिः ॥ ९॥

गूढ विद्या जगन्माया देहे चाज्ञान संभवा ।

उदयः यत्प्रकाशेन गुरुशब्देन कथ्यते ॥ १० ॥

सर्वपापविशुद्धात्मा श्रीगुरोः पादसेवनात् ।
देही ब्रह्म भवेद्यस्मात् त्वत्कृपार्थं वदामि ते ॥ ११ ॥

गुरुपादांबुजं स्मृत्वा जलं शिरसि धारयेत् ।
सर्व तीर्थावगाहस्य संप्राप्नोति फलं नरः ॥ १२ ॥

शोषनं पाप पङ्कस्य दीपनं ज्ञान तेजसाम् ।
गुरुपादोदकं सम्यक् संसारार्णव तारकम् ॥ १३ ॥

अज्ञान मूल हरणं जन्म कर्म निवारणम् ।
ज्ञान वैराग्य सिद्ध्यर्थं गुरु पादोदकं पिबेत् ॥ १४ ॥

गुरोः पादोदकं पीत्वा गुरोरुच्छिष्टभोजनम् ।
गुरुमूर्तेः सदा ध्यानं गुरुमंत्रं सदा जपेत् ॥ १५ ॥

काशीक्षेत्रं तन्निवासो जाह्नवी चरणोदकम् ।
गुरुर्विश्वेश्वरः साक्षात् तारकं ब्रह्म निश्चितम् ॥ १६ ॥

गुरोः पादोदकं यत्तु गयाऽसौ सोऽक्षयो वटः ।
तीर्थ राजः प्रयागश्च गुरुमूर्त्यै नमो नमः ॥ १७ ॥

गुरुमूर्तिं स्मरेन्नित्यं गुरु नाम सदा जपेत् ।
गुरोराज्ञां प्रकुर्वीत गुरोरन्यन्न भावयेत् ॥ १८ ॥

गुरुवक्त्र स्थितं ब्रह्म प्राप्यते तत्प्रसादतः ।
गुरोर्ध्यानं सदा कुर्यात् कुलस्त्री स्वपतेर्यथा ॥ १९ ॥

स्वाश्रमं च स्वजातिं च स्वकीर्तिपुष्टि वर्धनम् ।
एतत्सर्वं परित्यज्य गुरोरन्यन्न भावयेत् ॥ २० ॥

अनन्याश्चिन्तयन्तो मां सुलभं परमं पदम् ।
तस्मात् सर्व प्रयत्नेन गुरोराराधनं कुरु ॥ २१ ॥

त्रैलोक्ये स्फुट वक्तारो देवाद्यसुर पन्नगाः ।
गुरुवक्त्र स्थिता विद्या गुरुभक्त्ये तु लभ्यते ॥ २२ ॥

गुकारस्त्वन्धकारश्च रुकारस्तेज उच्यते ।
अज्ञान ग्रासकं ब्रह्म गुरुरेव न संशयः ॥ २३ ॥

गुकारः प्रथमो वर्णो मायादि गुण भासकः ।
रुकारो द्वितीयो ब्रह्म माया भ्रान्ति विनाशनम् ॥ २४ ॥

एवं गुरुपदं श्रेष्ठं देवानामपि दुर्लभम् ।
हाहा हूहू गणैश्चैव गन्धर्वैश्च प्रपूज्यते ॥ २५ ॥

ध्रुवं तेषां च सर्वेषां नास्ति तत्त्वं गुरोः परम् ।
आसनं शयनं वस्त्रं भूशनं वाहनादिकम् ॥ २६ ॥

साधकेन प्रदातव्यम् गुरु संतोष कारकम् ।
गुरोराराधनं कार्यं स्वजीवितं निवेदयेत् ॥ २७ ॥

कर्मणा मनसा वाचा नित्यमाराधयेद्गुरुम् ।
दीर्घ दण्डं नमस्कृत्य निर्लज्जो गुरुसन्निधौ ॥ २८ ॥

शरीरं इन्द्रियं प्राणां सद्गुरुभ्यो निवेदयेत् ।
आत्मदारादिकं सर्वं सद्गुरुभ्यो निवेदयेत् ॥ २९ ॥

कृमि कीट भस्म विष्ठा दुर्गन्धि मलमूत्रकम् ।
श्लेष्म रक्तं त्वचा मांसं वञ्चयेन्न वरानने ॥ ३० ॥

संसारवृक्षमारूढाः पतन्तो नरकार्णवे ।
येन चैवोद्धृताः सर्वे तस्मै श्री गुरवे नमः ॥ ३१ ॥

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुरेव परब्रह्म तस्मै श्री गुरवे नमः ॥ ३२ ॥

हेतवे जगतामेव संसारार्णव सेतवे ।
प्रभवे सर्व विद्यानां शम्भवे गुरवे नमः ॥ ३३ ॥

अज्ञानतिमिरान्धस्य ज्ञानाञ्जन शलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्री गुरवे नमः ॥ ३४ ॥

त्वं पिता त्वं च मे माता त्वं बन्धुस्त्वं च देवता ।
संसार प्रतिबोधार्थं तस्मै श्रीगुरवे नमः ॥ ३५ ॥

यत्सत्येन जगत्सत्यं यत्प्रकाशेन भाति तत् ।
यदानन्देन नन्दन्ति तस्मै श्री गुरवे नमः ॥ ३६ ॥

यस्य स्थित्या सत्यमिदं यद्भाति भानुरूपतः ।
प्रियं पुत्रदी यत्प्रीत्या तस्मै श्री गुरवे नमः ॥ ३७ ॥

येन चेतयते हीदं चित्तं चेतयते न यम् ।
जाग्रत् स्वप्न सुषुप्त्यादि तस्मै श्री गुरवे नमः ॥ ३८ ॥

यस्य ज्ञानादिदं विश्वं न दृश्यं भिन्नभेदतः ।
सदेकरूपरूपाय तस्मै श्री गुरवे नमः ॥ ३९॥

यस्यामतं तस्य मतं मतं यस्य न वेद सः ।
अनन्य भाव भावाय तस्मै श्री गुरवे नमः ॥ ४०॥

यस्य कारणरूपस्य कार्य रूपेण भाति यत् ।
कार्य कारण रूपाय तस्मै श्री गुरवे नमः ॥ ४१॥

नानारूपं इदं सर्वं न केनाप्यस्ति भिन्नता ।
कार्य कारणता चैव तस्मै श्री गुरवे नमः ॥ ४२॥

यदङ्घ्रि कमल द्वन्द्वं द्वन्द्वतापनिवारकम् ।
तारकं सर्वदाऽपद्भ्यः श्रीगुरुं प्रणमाम्यहम् ॥ ४३॥

शिवे क्रुद्धे गुरुस्त्राता गुरौ क्रुद्धे शिवो नहि ।
तस्मात् सर्व प्रयत्नेन श्रीगुरुं शरणं व्रजेत् ॥ ४४॥

वन्दे गुरुपदद्वन्द्वं वाङ्मनश्चित्तगोचरम् ।
श्वेतरक्तप्रभाभिन्नं शिवशक्त्यात्मकं परम् ॥ ४५॥

गुकारं च गुणातीतं रुकारं रूपवर्जितम् ।
गुणातीतस्वरूपं च यो दद्यात्स गुरुः स्मृतः ॥ ४६॥

अ- त्रिनेत्रः सर्वसाक्षी अ- चतुर्बाहुरच्युतः ।
अ- चतुर्वदनो ब्रह्मा श्री गुरु कथितः प्रिये ॥ ४७॥

अयं मयाञ्जलिर्बद्धो दया सागर वृद्धये ।
यदनुग्रहतो जन्तुश्चित्रसंसारमुक्तिभाक् ॥ ४८॥

श्रीगुरोः परमं रूपं विवेकचक्षुषोऽमृतम् ।
मन्द भाग्या न पश्यन्ति अन्धाः सूर्योदयं यथा ॥ ४९॥

श्रीनाथ चरण द्वन्द्वं यस्यां दिशि विराजते ।
तस्यै दिशे नमस्कुर्याद् भक्त्या प्रतिदिनं प्रिये ॥ ५०॥

तस्यै दिशे सततमञ्जलिरेश आर्ये
प्रक्षिप्यते मुखरितो मधुपैर्बुधैश्च ।
जागर्ति यत्र भगवान् गुरुचक्रवर्ती
विश्वोदयप्रलयनाटकनित्यसाक्षी ॥ ५१॥

श्रीनाथादि गुरुत्रयं गणपतिं पीठत्रयं भैरवं
सिद्धौघं बटुकत्रयं पदयुगं दूतीत्रयं शांभवम् ।
वीरेशाष्टचतुष्कषष्टिनवकं वीरावलीपञ्चकं
श्रीमन्मालिनिमंत्रराजसहितं वन्दे गुरोर्मण्डलम् ॥ ५२॥

अभ्यस्तैः सकलैः सुदीर्घमनिलैर्व्याधिप्रदैर्दुष्करैः
प्राणायाम शतैरनेककरणैर्दुःखात्मकैर् दुर्जयैः ।
यस्मिन्नभ्युदिते विनश्यति बली वायुः स्वयं तत्क्षणात्
प्राप्तुं तत्सहजं स्वभावमनिशं सेवध्वमेकं गुरुम् ॥ ५३॥

स्वदेशिकस्यैव शरीरचिन्तनम्
भवेदनन्तस्य शिवस्य चिन्तनम् ।
स्वदेशिकस्यैव च नामकीर्तनम्
भवेदनन्तस्य शिवस्य कीर्तनम् ॥ ५४॥

यत्पाद रेणु कणिका कापि संसारवारिधेः ।
सेतुबन्धायते नाथं देशिकं तमुपास्महे ॥ ५५॥

यस्मादनुग्रहं लब्ध्वा महदज्ञानमुत्सृजेत् ।
तस्मै श्री देशिकेन्द्राय नमश्चाभीष्टसिद्धये ॥ ५६॥

पादाब्जं सर्वसंसार- दावानलविनाशकम् ।
ब्रह्मरन्ध्रे सितांभोज- मध्यस्थं चन्द्रमण्डले ॥ ५७॥

अकथादि त्रिरेखाब्जे सहस्रदल मण्डले ।
हंस पार्श्व त्रिकोणे च स्मरेत्तन्मध्यगं गुरुम् ॥ ५८॥

सकल भुवन सृष्टिः कल्पिताशेषपुष्टि-
र्निखिल निगम दृष्टिः संपदं व्यर्थदृष्टिः ।
अवगुण परिमार्ष्टिस्तत्पदार्थैक दृष्टि-
र्भव गुण परमेष्टिर्मोक्षमार्गैक दृष्टिः ॥ ५९॥

सकलभुवनरङ्ग स्थापनास्तंभयष्टिः
सकरुणरसवृष्टिस्तत्त्वमालासमष्टिः ।
सकलसमयसृष्टिः सच्चिदानन्द दृष्टि
र्निवसतु मयि नित्यं श्रीगुरोर्दिव्यदृष्टिः ॥ ६०॥

अग्नि शुद्ध समन्तात ज्वाला परिचकाधिया ।
मन्त्रराजमिमं मन्येऽहर्निशं पातु मृत्युतः ॥ ६१॥

तदेजति तन्नैजति तद्दूरे तत्समीपके ।
तदंतरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः ॥ ६२॥

अजोऽहमजरोऽहं च अनादिनिधनः स्वयम् ।
अविकारश्चिदानन्द अणीयान् महतो महान् ॥ ६३॥

अपूर्वाणां परं नित्यं स्वयंज्योतिर्निरामयम् ।
विरजं परमाकाशं ध्रुवमानन्दमव्ययम् ॥ ६४॥

श्रुतिः प्रत्यक्षमैतिह्यमनुमानश्चतुष्टयम् ।
यस्य चात्मतपो वेद देशिकं च सदा स्मरेत् ॥ ६५॥

मननं यद्भवं कार्यं तद्वदामि महामते ।
साधुत्वं च मया दृष्ट्वा त्वयि तिष्ठति सांप्रतम् ॥ ६६॥

अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥ ६७॥

सर्व श्रुति शिरोरत्न विराजित पदांबुजः ।
वेदान्तांबुज सूर्यो यस्तस्मै श्रीगुरवे नमः ॥ ६८॥

यस्य स्मरणमात्रेण ज्ञानमुत्पद्यते स्वयम् ।
य एव सर्व संप्राप्तिस्तस्मै श्रीगुरवे नमः ॥ ६९॥

चैतन्यं शाश्वतं शान्तं व्योमातीतं निरञ्जनम् ।
नाद बिन्दु कलातीतं तस्मै श्रीगुरवे नमः ॥ ७०॥

स्थावरं जङ्गमं चैव तथा चैव चराचरम् ।
व्याप्तं येन जगत्सर्वं तस्मै श्रीगुरवे नमः ॥ ७१॥

ज्ञान शक्ति समारूढस्तत्त्वमाला विभूषितः ।
भुक्तिमुक्तिप्रदाता यस्तस्मै श्रीगुरवे नमः ॥ ७२॥

अनेकजन्मसंप्राप्त सर्वकर्मविदाहिने ।
स्वात्मज्ञानप्रभावेण तस्मै श्रीगुरवे नमः ॥ ७३॥

न गुरोरधिकं तत्त्वं न गुरोरधिकं तपः ।
तत्त्वं ज्ञानात्परं नास्ति तस्मै श्रीगुरवे नमः ॥ ७४॥

मन्नाथः श्रीजगन्नाथो मद्गुरुस्त्रिजगद्गुरुः ।
ममात्मा सर्व भूतात्मा तस्मै श्रीगुरवे नमः ॥ ७५॥

ध्यानमूलं गुरोर्मूर्तिः पूजामूलं गुरोः पदम् ।
मन्त्रमूलं गुरोर्वाक्यं तस्मै श्रीगुरवे नमः ॥ ७६॥

गुरुरादिरनादिश्च गुरुः परम दैवतम् ।
गुरोः परतरं नास्ति तस्मै श्रीगुरवे नमः ॥ ७७॥

सप्त सागर पर्यन्त तीर्थ स्नानादिकं फलम् ।
गुरोरङ्घ्रिपयोबिन्दुसहस्रांशे न दुर्लभम् ॥ ७८॥

हरौ रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन ।
तस्मात्सर्वप्रयत्नेन श्रीगुरुं शरणं व्रजेत् ॥ ७९॥

गुरुरेव जगत्सर्वं ब्रह्म विष्णु शिवात्मकम् ।
गुरोः परतरं नास्ति तस्मात्संपूजयेद्गुरुम् ॥ ८०॥

ज्ञानं विज्ञानसहितं लभ्यते गुरुभक्तितः ।
गुरोः परतरं नास्ति ध्येयोऽसौ गुरुमार्गिभिः ॥ ८१॥

यस्मात्परतरं नास्ति नेति नेतीति वै श्रुतिः ।
मनसा वचसा चैव नित्यमाराधयेद्गुरुम् ॥ ८२॥

गुरोः कृपा प्रसादेन ब्रह्म विष्णु सदाशिवाः ।
समर्थाः प्रभवादौ च केवलं गुरुसेवया ॥ ८३॥

देव किन्नर गन्धर्वाः पितरो यक्षचारणाः ।
मुनयोऽपि न जानन्ति गुरुशुश्रूषणे विधिम् ॥ ८४॥

महाहङ्कारगर्वेण तपोविद्याबलान्विताः ।
संसारकुहरावर्ते घट यन्त्रे यथा घटाः ॥ ८५॥

न मुक्ता देवगन्धर्वाः पितरो यक्षकिन्नराः ।
ऋषयः सर्वसिद्धाश्च गुरुसेवा पराङ्मुखः ॥ ८६॥

ध्यानं शृणु महादेवि सर्वानन्द प्रदायकम् ।
सर्वसौख्यकरं नित्यं भुक्तिमुक्तिविधायकम् ॥ ८७॥

श्रीमत्परब्रह्म गुरुं स्मरामि श्रीमत्परब्रह्म गुरुं वदामि ।
श्रीमत्परब्रह्म गुरुं नमामि श्रीमत्परब्रह्म गुरुं भजामि ॥ ८८॥

ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिम् ।
द्वन्द्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम् ।
एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतम्
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥ ८९

नित्यं शुद्धं निराभासं निराकारं निरञ्जनम् ।
नित्यबोधं चिदानन्दं गुरुं ब्रह्म नमाम्यहम् ॥ ९०॥

हृदंबुजे कर्णिकमध्यसंस्थे सिंहासने संस्थितदिव्यमूर्तिम् ।
ध्यायेद्गुरुं चन्द्रकलाप्रकाशम् चित्पुस्तकाभीष्टवरं दधानम् ॥ ९१॥

श्वेतांबरं श्वेतविलेपपुष्पं मुक्ताविभूषं मुदितं द्विनेत्रम् ।
वामांकपीठस्थितदिव्यशक्तिं मंदस्मितं सांद्रकृपानिधानम् ॥ ९२॥

आनंदमानंदकरं प्रसन्नं ज्ञानस्वरूपं निजबोधयुक्तम् ।
योगींद्रमीड्यं भवरोगवैद्यं श्रीमद्गुरुं नित्यमहं नमामि ॥ ९३॥

यस्मिन्सृष्टिस्थितिध्वंस- निग्रहानुग्रहात्मकम् ।
कृत्यं पंचविधं शश्वद्भासते तं नमाम्यहम् ॥ ९४॥

प्रातः शिरसि शुक्लाब्जे द्विनेत्रं द्विभुजं गुरुम् ।
वराभययुतं शांतं स्मरेत्तं नामपूर्वकम् ॥ ९५॥

न गुरोरधिकं न गुरोरधिकं न गुरोरधिकं न गुरोरधिकम् ।
शिवशासनतः शिवशासनतः शिवशासनतः शिवशासनतः ॥ ९६॥

इदमेव शिवं त्विदमेव शिवं त्विदमेव शिवं त्विदमेव शिवम् ।
मम शासनतो मम शासनतो मम शासनतो मम शासनतः ॥ ९७॥

एवंविधं गुरुं ध्यात्वा ज्ञानमुत्पद्यते स्वयम् ।
तत्सद्गुरुप्रसादेन मुक्तोऽहमिति भावयेत् ॥ ९८॥

गुरुदर्शितमार्गेण मनःशुद्धिं तु कारयेत् ।
अनित्यं खंडयेत्सर्वं यत्किंचिदात्मगोचरम् ॥ ९९॥

ज्ञेयं सर्वस्वरूपं च ज्ञनं च मन उच्यते ।
ज्ञानं ज्ञेयसमं कुर्यान् नान्यः पंथा द्वितीयकः ॥ १००॥

एवं श्रुत्वा महादेवि गुरुनिंदां करोति यः ।
स याति नरकं घोरं यावच्चंद्रदिवाकरौ ॥ १०१॥

यावत्कल्पांतको तेहस्तावदेव गुरुं स्मरेत् ।
गुरुलोपो न कर्तव्यः स्वच्छंदो यदि वा भवेत् ॥ १०२॥

हुंकारेण न वक्तव्यं प्राज्ञैः शिष्यैः कथंचन ।
गुरोरग्रे न वक्तव्यमसत्यं च कदाचन ॥ १०३॥

गुरुं त्वं कृत्य हुं कृत्य गुरुं निर्जित्य वादतः ।
अरण्ये निर्जले देशे स भवेद् ब्रह्मराक्षसः ॥ १०४॥

मुनिभिः पन्नगैर्वाऽपि सुरैर्वा शापितो यदि ।
कालमृत्युभयाद्वापि गुरू रक्षति पार्वति ॥ १०५॥

अशक्ता हि सुराद्याश्च अशक्ता मुनयस्तथा ।
गुरुशापेन ते शीघ्रं क्षयं यांति न संशयः ॥ १०६॥

मंत्रराजमिदं देवि गुरुरित्यक्षरद्वयम् ।
स्मृतिवेदार्थवाक्येन गुरुः साक्षात्परं पदम् ॥ १०७॥

श्रुति- स्मृती अविज्ञाय केवलं गुरु सेवकाः ।
ते वै संन्यासिनः प्रोक्ता इतरे वेषधारिणः ॥ १०८॥

नित्यं ब्रह्म निराकारं निर्गुअणं बोधयेत्परम् ।
सर्वं ब्रह्म निराभासं दीपो दीपान्तरं यथा ॥ १०९॥

गुरोः कृपाप्रसादेन आत्मारामं निरीक्षयेत् ।
अनेन गुरुमार्गेण स्वात्मज्ञानं प्रवर्तते ॥ ११०॥

आब्रह्मस्तंबपर्यंतं परमात्मस्वरूपकम् ।
स्थावरं जंगमं चैव प्रणमामि जगन्मयम् ॥ १११॥

वंदेऽहं सच्चिदानंदं भेदातीतं सदा गुरुम् ।
नित्यं पूर्णं निराकारं निर्गुणं स्वात्मसंस्थिकम् ॥ ११२॥

परात्परतरं ध्येयं नित्यमानंदकारकम् ।
हृदयाकाशमध्यस्थं शुद्धस्फटिकसन्निभम् ॥ ११३॥

स्फटिकप्रतिमारूपं दृश्यते दर्पणे यथा ।
तथात्मनि चिदाकारमानंदं सोऽहमित्युत ॥ ११४॥

अंगुष्ठमात्रपुरुषं ध्यायतश्चिन्मयं हृदि ।
तत्र स्फुरति भावो यः श्रुणु तं कथयाम्यहम् ॥ ११५॥

अजोऽहममरोहऽहं च ह्यनादिनिधनोऽह्यहम् ।
अविकारश्चिअदानन्दो ह्यणीयान्महतो महान् ॥

अपूर्वमपरं नित्यं स्वयंज्योतिर्निरामयम् ।
विरजं परमाकाशं ध्रुवमानन्दमव्ययम् ॥

अगोचरं तथा गम्यं नामरूपविवर्जितम् ।
निःशब्दं तद्विजानीयात् स्वभावं ब्रह्म पार्वति ॥ ११६॥

यथा गंधः स्वभावेन कर्पूरकुसुमादिषु ।
शीतोष्णादिस्वभावेन तथा ब्रह्म च शाश्वतम् ॥ ११७॥

स्वयं तथाविदो भूत्वा स्थातव्यं यत्रकुत्रचित् ।

कीटभ्रमरवत्तत्र ध्यानं भवति तादृशम् ॥ ११८ ॥

गुरुध्यानं तथा कृत्वा स्वयं ब्रह्ममयो भवेत् ।
पिंडे पदे तथा रूपे मुक्तोऽसौ नात्र संशयः ॥ ११९ ॥

स्वयं सर्वमयो भूत्वा परं तत्त्वं विलोकयेत् ।
परात्परतरं नान्यत् सर्वमेतन्निरालयम् ॥ १२० ॥

तस्यावलोकनं प्राप्य सर्वसंगविवर्जितम् ।
एकाकी निःस्पृहः शंतस्तिष्ठासेत्तत्प्रसादतः ॥ १२१ ॥

लब्धं वाऽथ न लब्ध्वं वा स्वल्पं वा बहुलं तथा ।
निष्कामेनैव भोक्तव्यं सदा संतुष्टचेतसा ॥ १२२ ॥

सर्वज्ञपदमित्याहुर्देही सर्वमयो बुधाः ।
सदानंदः सदा शांतो रमते यत्रकुत्रचित् ॥ १२३ ॥

यत्रैवे तिष्ठते सोऽपि स देशः पुण्यभाजनम् ।
मुक्तस्य लक्षणं देवि तवाग्रे कथितं मया ॥ १२४ ॥

उपदेशस्तथा देवि गुरुमार्गेण मुक्तिदः ।
गुरुभक्तिस्तथा ध्यानं सकलं तव कीर्तितम् ॥ १२५ ॥

अनेन यद्भवेत्कार्यं तद्वदामि महामते ।
लोकोपकारकं देवि लौकिकं तु न भावयेत् ॥ १२६ ॥

लौकिकात्कर्मणो यांति ज्ञानहीना भवार्णवम् ।
ज्ञानी तु भावयेत्सर्वं कर्म निष्कर्म यत्कृतम् ॥ १२७ ॥

इदं तु भक्तिभावेन पठते श्रुणुते यदि ।
लिखित्वा तत्प्रदातव्यं दानं दक्षिणया सह ॥ १२८ ॥

गुरुगीतात्मकं देवि शुद्धतत्त्वं मयोदितम् ।
भवव्याधिविनाशार्थं स्वयमेव जपेत्सदा ॥ १२९ ॥

गुरुगीताक्षरैकं तु मंत्रराजमिमं जपेत् ।
अन्ये च विविधा मंत्राः कलां नार्हंति षोडशीम् ॥ १३० ॥

अनंतफलमाप्नोति गुरुगीताजपेन तु ।
सर्वपापप्रशमनं सर्वदारिद्र्यनाशनम् ॥ १३१ ॥

कालमृत्युभयहरं सर्वसंकटनाशनम् ।
यक्षराक्षसभूतानां चोरव्याघ्रभयापहम् ॥ १३२ ॥

महाव्याधिहरं सर्वं विभूतिसिद्धिदं भवेत् ।
अथवा मोहनं वश्यं स्वयमेव जपेत्सदा ॥ १३३ ॥

कुशैर्वा दूर्वया देवि आसने शुभ्रकंबले ।
उपविश्य ततो देवि जपेदेकाग्रमानसः ॥ १३४ ॥

ध्येयं शुक्लं च शांत्यर्थं वश्ये रक्तासनं प्रिये ।
अभिचारे कृष्णवर्णं पीतवर्णं धनागमे ॥ १३५ ॥

उत्तरे शांतिकामस्तु वश्ये पूर्वमुखो जपेत् ।
दक्षिणे मारणं प्रोक्तं पश्चिमे च धनागमः ॥ १३६ ॥

आग्नेय्यं कर्षणं चैव वायव्यां शत्रुनाशनम् ।
नैर्ऋत्यां दर्शनं चैव ईशान्यं ज्ञानमेव च ॥

वस्त्रासने च दारिद्र्यं पाषाणे रोगसंभवः ।
मेदिन्यां दुःखमाप्नोति काष्ठे भवति निष्फलम् ॥

कृष्णाजिने ज्ञानसिद्धिर्मोक्षश्रीर्व्याघ्रचर्मणि ।
कुशासने ज्ञानसिद्धिः सर्वसिद्धिस्तु कम्बले ॥

मोहनं सर्वभूतानां बंधमोक्षकरं भवेत् ।
देवराजप्रियकरं सर्वलोकवशं भवेत् ॥ १३७ ॥

सर्वेषां स्तंभनकरं गुणानां च विवर्धनम् ।
दुष्कर्मनाशनं चैव सुकर्म सिद्धिदं भवेत् ॥ १३८ ॥

असिद्धं साधयेत्कार्यं नवग्रहभयापहम् ।
दुःस्वप्ननाशनं चैव सुस्वप्नफलदायकम् ॥ १३९ ॥

सर्वशांतिकरं नित्यं तथा वंध्या सुपुत्रदम् ।
अवैधव्यकरं स्त्रीणां सौभाग्यदायकं सदा ॥ १४० ॥

आयुरारोग्यमैश्वर्यं पुत्रपौत्रप्रवर्धनम् ।
अकामतःस्त्री विधवा जपान्मोक्षमवाप्नुयात् ॥ १४१ ॥

अवैधव्यं सकामा तु लभते चान्यजन्मनि ।
सर्वदुःखभयं विघ्नं नाशयेच्छापहारकम् ॥ १४२ ॥

सर्वबाधाप्रशमनं धर्मार्थकाममोक्षदम् ।
यं यं चिंतयते कामं तं तं प्राप्नोति निश्चितम् ॥ १४३ ॥

कामितस्य कामधेनुः कल्पनाकल्पपादपः ।
चिन्तामणिश्चिन्तितस्य सर्व मंगलकारकम् ॥१४४॥

मोक्षहेतुर्जपेन्नित्यं मोक्षश्रियमवाप्नुयात् ।
भोगकामो जपेद्यो वै तस्य कामफलप्रदम् ॥१४५॥

जपेच्छाक्तस्य सौरश्च गाणपत्यश्च वैष्णव ।
शैवश्च सिद्धिदं देवि सत्यं सत्यं न संशयः ॥१४६॥

अथ काम्यजपे स्थानं कथयामि वरानने ।
सागरे वा सरित्तीरेऽथवा हरिहरालये ॥१४७॥

शक्तिदेवालये गोष्ठे सर्वदेवालये शुभे ।
वटे च धात्रीमूले वा मठे वृन्दावने तथा ॥१४८॥

पवित्रे निर्मले स्थाने नित्यानुष्ठानतोऽपि वा ।
निर्वेदनेन मौनेन जपमेतं समाचरेत् ॥१४९॥

स्मशाने भयभूमौ तु वटमूलान्तिके तथा ।
सिद्ध्यन्ति धौतरे मूले चूतवृक्षस्य सन्निधौ ॥१५०॥

गुरुपुत्रो वरं मूर्खस्तस्य सिद्ध्यन्ति नान्यथा ।
शुभकर्माणि सर्वाणि दीक्षाव्रततपांसि च ॥१५१॥

संसारमलनाशार्थं भवपाशनिवृत्तये ।
गुरुगीताम्भसिस्नानं तत्त्वज्ञः कुरुते सदा ॥१५२॥

स एव च गुरुः साक्षात् सदा सद् ब्रह्मवित्तमः ।
तस्य स्थानानि सर्वाणि पवित्राणि न संशयः ॥१५३॥

सर्वशुद्धः पवित्रोऽसौ स्वभावद्यत्र तिष्ठति ।
तत्र देवगणाः सर्वे क्षेत्रे पीठे वसन्ति हि ॥१५४॥

आसनस्थः शयानो वा गच्छंस्तिष्ठन् वदन्नपि ।
अश्वारूढो गजारूढः सुप्तो वा जागृतोऽपि वा ॥१५५॥

शुचिष्मांश्च सदा ज्ञानी गुरुगीताजपेन तु ।
तस्य दर्शनमात्रेण पुनर्जन्म न विद्यते ॥१५६॥

समुद्रे च यथा तोयं क्षीरे क्षीरं घृते घृतम् ।
भिन्ने कुंभे यथाकाशस्तथात्मा परमात्मनि ॥१५७॥

तथैव ज्ञानी जीवात्मा परमात्मनि लीयते ।
ऐक्येन रमते ज्ञानी यत्र तत्र दिवानिशम् ॥१५८॥

गुरो संतोषिने सर्वे मुक्तास्ते नात्र संशयः ।
भुक्तिमुक्तिदयास्तेषां जिव्हाग्रे च सरस्वती ॥

एवंविधो महामुक्तः सर्वदा वर्तते बुधः ।
तस्य सर्व प्रयत्नेन भावभक्तिं करोति यः ॥१५९॥

सर्वसन्देहरहितो मुक्तो भवति पार्वति ।
भुक्तिमुक्तिद्वयं तस्य जिव्हाग्रे च सरस्वती ॥१६०॥

अनेन प्राणिनः सर्वे गुरुगीता जपेन तु ।
सर्वसिद्धिं प्राप्नुवन्ति भुक्तिं मुक्तिं न संशयः ॥१६१॥

सत्यं सत्यं पुनः सत्यं धर्मं सांख्यं मयोदितम् ।
गुरुगीतासमं नास्ति सत्यं सत्यं वरानने ॥१६२॥

एको देव एक धर्म एकनिष्ठा परंतपः ।
गुरोः परतरं नान्यन्नास्ति तत्त्वं गुरोः परम् ॥१६३॥

माता धन्या पिता धन्यो धन्यो वंशः कुलं तथा ।
धन्या च वसुधा देवि गुरुभक्तिः सुदुर्लभा ॥१६४॥

शरीरमिन्द्रियं प्राणश्चार्थः स्वजनबांधवाः ।
माता पिता कुलं देवि गुरुरेव न संशयः ॥१६५॥

आकल्पं जन्मना कोट्या जपव्रततपःक्रियाः ।
तत्सर्वं सफलं देवि गुरुसंतोशमात्रतः ॥१६६॥

विद्यातपोबलेनैव मंदभाग्याश्च ये नराः ।
गुरुसेवा न कुर्वन्ति सत्यं सत्यं वरानने ॥१६७॥

ब्रह्मविष्णुमहेशाश्च देवर्षिपितृकिन्नराः ।
सिद्धचारणयक्षाश्च अन्येऽपि मुनयो जनाः ॥१६८॥

संतुष्टः सुप्रसन्नाश्च गुरुभक्त्या भवंति हि ।
फलपुष्पाणि संधत्ते मूले सिक्तं जलं यथा ॥

गुरुभावः परं तीर्थमन्यतीर्थं निरर्थकम् ।
सर्वतीर्थाश्रयं देवि पादाङ्गुष्ठं च वर्तते ॥१६९॥

जपेन जयमाप्नोति चानन्तफलमाप्नुयात् ।
हीनकर्म त्यजन्सर्वं स्थानानि चाधमानि च ॥१७०॥

उग्रध्यानं कुक्कुटस्थं हीनकर्मफलप्रदम् ।
गुरुगीतां प्रयाणे वा संग्रामे रिपुसंकटे ॥१७१॥

जपते जयमाप्नोति मरणे मुक्तिदायकम् ।
सर्वकर्म च सर्वत्र गुरुपुत्रस्य सिद्ध्यति ॥१७२॥

इदं रहस्यं नो वाच्यं तवाग्रे कथितं मया ।
सुगोप्यं च प्रयत्नेन मम त्वं च प्रियात्विति ॥१७३॥

स्वामिमुख्यगणेषादिविष्णवादीनां च पार्वति ।
मनसापि न वक्तव्यं सत्यं सत्यं वदाम्यहम् ॥१७४॥

अतीवपक्वचित्ताय श्रद्धाभक्तियुताय च ।
प्रवक्तव्यमिदं देवि ममात्माऽसि सदा प्रिये ॥१७५॥

अभक्ते वंचके धूर्ते पाखंडे नास्तिके नरे ।
मनसापि न वक्तव्या गुरुगीता कदाचन ॥१७६॥

गुरवो बहवः संति शिष्यवित्तापहारकाः ।
दुर्लभोऽयं गुरुर्देवि शिष्यसंतापहारकः ॥

संसारसागरसमुद्धरणैकमंत्रम्
ब्रह्मादिदेवमुनिपूजितसिद्धमंत्रम् ॥
दारिद्र्यदुःखभयशोकविनाशमंत्रम्
वन्दे महाभयहरं गुरुराजमन्त्रम् ॥

॥इति श्रीस्कंदपुराणे उत्तरखंडे ईश्वरपार्वती संवादे गुरुगीता समाप्त ॥
॥ श्रीगुरुदत्तात्रेयार्पणमस्तु ॥

Transliterated by Kapila Shankaran

Please send corrections to sanskrit@cheerful.com
Last updated April 9, 2001